International Journal of Multidisciplinary Horizon

ISSN: 3049-2017
IJMH 2026; 3(4): 71-73
© 2026 IJMH
www.themultijournal.com
Received: 27-06-2026
Accepted: 18-07-2026
Publish : 21-07-2026

**प्रज्ञाप्रियदर्शिनी आचार्य**
शोधच्छात्रा,ज्योतिषविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**प्रज्ञाप्रियदर्शिनी आचार्य**
शोधच्छात्रा,ज्योतिषविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# लग्नादिद्वादशभावानां फलविचारः

**प्रज्ञाप्रियदर्शिनी आचार्य**

**उपक्रमः –**

ज्योतींषि अधिकृत्य प्रवृत्तं शास्त्रं ज्यौतिषं शास्त्रम्। यस्मिन् शास्त्रेऽपरिमितगगनमण्डले विद्यमानानां ग्रहनक्षत्राणां तथान्यज्योतिष्पिण्डानां चर्चा क्रियते तदेव ज्यौतिषं शास्त्रम्। व्यस्तबहुलाधुनिकसमाजे जनाः स्वाभीष्टसाधनाय कष्टाद्विमुक्तये च बहुव्यस्ताः व्यथिताश्च भवन्ति। सर्वे स्वस्य सर्वविधक-ष्टनिवारणार्थं यदि च बहूनुपायाननुसरन्ति तदपि प्रत्येकं विषये प्रतिक्षणं ज्योति-श्शास्त्रोक्त-शुभाशुभकालान् शास्त्रोक्तोपायान् च वाञ्छन्त्येव।

जातस्य शुभाशुभफलज्ञानाय जन्मकुण्डल्याः आवश्यकता वर्तते। ज्योतिषरत्नाकरे देवकीन-न्दनसिंहेनोक्तम् -"जन्मकुण्डली मनुष्यस्य पूर्वजन्मकृतकर्मणां साक्षादेव मूर्तिरूपा। पूर्वजन्मकर्मणः फलं जन्मकुण्डलीतः उपलभ्यते। यत् किञ्चिद् विस्तृतं तत्त्वं तद् सर्वं पूर्वजन्मजन्मान्तरकृतकर्मफलं जन्मकुण्डल्यां संङ्केतितं निर्दिष्टं च। विद्वांसः दिव्यदृष्ट्या ज्योतिषशास्त्रानुसारेण मनुष्यस्य भुक्ताभुक्तफलानि व्यवस्थिततया प्रकाशितवन्तः"।

जन्मकुण्डल्यां मुख्यतः द्वादशभावाः वर्तन्ते। मानवस्य विभागशः सकलविषयाणां विचारः यत्र क्रियते ते एव भावाः। भविष्यज्ञानार्थं द्वादशभावफलानि प्रमुखतया उपयुज्यन्ते। द्वादशभावानां संज्ञान्तराणि पराशरेणोक्तं यत् –

**तनुर्धनं च सहजो बन्धुपुत्रारयस्तथा।**
**युवतीरन्ध्र धर्माख्य कर्मलाभव्ययाः क्रमात् ॥**[1]

लग्नस्थग्रहफलम् –

**लग्नेऽर्के चक्षुरोगी शशिनि बलयुतो गर्वितो जातकः स्यात् ।**
**भौमे व्यङ्गः सरागो निशिपतितनये सर्वशास्त्रेषु विज्ञः ।**
**जीवे दाता पवित्रो दितितनये गुरौ काव्यशास्त्रे प्रमोदी**
**सौरौ कण्डुस्थरोगी तमसि खलमतिर्दुखितो धर्महीनः ॥**[2]

अतः यदि लग्ने रविः स्यात्तर्हि जातकः चक्षूरोगेण पीडितो जायते। लग्ने चन्द्रे जातकः बली गर्वितश्च, मङ्गलयुक्ते विरूपदेहः क्रोधयुक्तश्च, बुधे सति सर्वशास्त्रनिपुणः, बृहस्पतौ दाता शुद्धः आचार्यश्च, लग्नेस्थे शुक्रे जातकः काव्यशास्त्रप्रमोदी, शनौ कण्डुरोगयुक्तश्च भवति। तथैव राहुः लग्ने चेत्तर्हि जातकः खलस्वभावयुक्तो धर्महीनश्च जायते। लग्नस्थे केतौ राहुवत्फलं चिन्तनीयम्। एतस्मिन् विषये फलदीपिकायां श्रीमन्त्रेश्वरदैवज्ञः प्रतिपादयति यथा –

**लग्नेऽर्केऽल्पकचः क्रियालसतमः क्रोधी प्रचण्डोन्नतो**
**मानी लोचनरूक्षकः कृशतनुः शूरोऽक्षमो निघृणः ।**
**स्फोटाक्षः शशिभे क्रिये सतिमिरः सिंहे निशान्धः पुमान्**
**दारिद्र्योपहतो विनष्टतनयो जातस्तुलायां भवेत् ॥**[3]

लग्ने बृहस्पतौ जातकस्य किदृशं फलं प्राप्यते इति विषये श्रीमत्कल्याणवर्मसूरीणा प्रतिपादितम् –

**होरासंस्थे जीवे सुशरीरः प्राणवान् सुदीर्घायुः ।**
**सुसमीक्षितकार्यकरः प्राज्ञो धीरस्तथार्यश्च ॥**[4]

**द्वितीयभावस्थग्रहफलम् –**

द्वितीयभावे स्थितानां सूर्यादिग्रहाणां फलविचारः श्रीश्यामसुन्दरनायकः बृहज्ज्योतिषसारसंग्रहग्रन्थे समुल्लिखति यथा -

**अर्कोवैनिर्द्धनं स्याच्छशिनिवहुधन श्चारके द्युतृकः स्यात्**
**पाण्डित्यं चन्दपुत्रेसु वहुधनयुतोवाक्पतौवैसुखीस्यात् ।**
**शुक्रे विद्यां गृहं वै वहूसुतरमणी नृत्यनाट्येकलापी**
**सौरौ क्लेदोऽपि दुःखं विगतनखनरो राहुकेतू द्वितीयो ॥[5]**

यदि धनस्थाने रविः स्यात्तर्हि जातकः धनहीनः, चन्द्रस्थितौ बहुधनलाभः, मङ्गले द्यूतप्रियः, बुधयुक्ते विद्वान्, बृहस्पतौ बहुधनयुक्तः सुखी च, शुक्रः स्यात्तर्हि सः विद्वान् पुत्रवान् स्त्रीयुक्तः नृत्यप्रेमी च, शनौ जातकः क्लेशयुक्तः दुःखी, राहुकेतू द्वितीयभावे स्थितौ चेज्जातकः नखरोगेण पीडितो भवति।

द्वितीयभावे सूर्यो भवति चेज्जातकः निर्धनीति मन्त्रेश्वरदैवज्ञः प्रतिपादयति यथ -

**विगतविद्याविनयवित्तं स्खलितवाचं धनगतः ।[6]**
**सबलशौर्यश्रियमुदारं स्वजनशत्रुं सहजगः।**
**जनयतीमं सुहृदि सूर्यो विसुखबन्धुक्षितिसुहृद्**
**भवनमुक्तं नृपतिसेवा जनकसम्पद्व्ययकरम्॥**

द्वितीयस्थे चन्द्रः तिष्ठति चेत् जातकः कियत् फलं प्राप्यते इति विषये श्रीमत्कल्याणवर्मसूरिणा सारावल्यायां प्रतिपादितम् –

**अललितसुखमित्रयुतो धनैश्च चन्द्रे द्वितीयराशिगते ।**
**सम्पूर्णेऽतिधनेशो भवति नरेऽल्पप्रलापकरः ॥[7]**

द्वितीयभावे बुधः तिष्टति चेत् जातकः बुद्धियुक्तो भवति इति विषये मन्त्रश्वरदैवज्ञः प्रतिपादयति -

**स्याद्बुद्ध्योपार्जितस्वः कविरमलवाचा वाचिम्ष्टान्नभोक्ता ।[8]**

**तृतीयभावस्थस्थग्रहफलम् –**

तृतीयभावस्थितानां सूर्यादिग्रहाणां फलविचारः बृहज्ज्योतिषसार-संग्रहग्रन्थे श्रीश्यामसुन्दरनायकेन लिखितं यथा –

**सौरोभौमन्तु नित्यां सहजनिधनकृन्नातृगर्भे च सूर्यः**
**जीवे चन्द्रे सुखी स्यान्नशिपतितनये शस्यगो वित्तलाभः**
**नानादेशे सनित्यं भ्रमति सुजनप्रेक्षणथैव शुक्रे**
**सवैर्लोकैर्नियन्त्रंहि सुजनविमुख राहु केतु तृतीये ॥**

यदि तृतीयस्थाने रविः स्यात् तर्हि जातकस्य सहोदरः मातृगर्भे विनश्यति। चन्द्रस्थिते सुखी, भौमयुक्ते सहोदरनाशः, बुधयुक्ते गोध-नशस्यवित्तलाभकारी, बृहस्पतौ स्थिते जातकः सुखी, शुक्रयुक्ते नानादेशभ्रमणकारी सज्जनसमागमशीलः, शनौ सहोदरहन्ता, राहुकेतू स्थितौ सर्वजनैः पराजिताः सज्जनेषु विमुखश्च भवति इति ज्ञायते।

तृतीयभावे भौमयुक्ते सहोदरनाशजायते इति विषये मन्त्रश्वरदैवज्ञः प्रतिपादयति यथा-

**सुगुणधनवाञ्छूरोऽधृष्यःसुखी व्यनुजोऽनुजे ।[9]**

बृहत्पराशरहोराशास्त्रे पराशरमुनिना तृतीयभावयुक्ते भौमस्य फलविषये उक्तम् –

**सभौमो भ्रातृभावेशो भातृभावमभीक्षते ।**
**भातृक्षेत्रगतो वापि सुखं भ्रातृर्विनिर्देशेत् ॥[10]**

जन्मकाले तृतीयभावे स्थिते शुक्रः कियत् फलं प्रयच्छति इति विषये श्रीमत्कल्याणवर्मसूरिणा उक्तम् –

**सुखधनसहितं शुक्रो दुश्चिक्ये स्त्रीजितं तथा कृपणम् ।**
**जनयति मन्देत्साहं सौभाग्यपरिच्छदातीतम् ॥[11]**

**चतुर्थभावस्थग्रहफलम् –**

चतुर्थस्थाने रविः चेत् सः पुरुषः सर्वदा ऋणयुक्तः प्रवासी च भवति। चन्द्रस्थिते सः सुखी भवति। मङ्गलस्थिते प्रवासी ऋणवान् च वर्त्तते। बुधस्थिते हस्त्यश्वगोदोलानां अधिपतिर्भवति। बृहस्प-तिशुक्रौ च बुधवत् समफलं प्रयच्छन्ति। शनियुक्ते मित्रहानिः जायते। राहुकेतू स्थितेः ऋणयुक्तः प्रवासी च भवति।[12]

चतुर्थभावे रवि तिष्ठति चेत् –

**वाहनबन्धुविहिनः पीडितहृदयश्चतर्थके सूर्यः।**
**पितृगृहधननाशकरो भवति नरः कुनृपसेवी च।[13]**

चतुर्थभावे केतुस्थिते जातकः प्रवासी भवति। अस्य विषये मन्त्रेश्वरः प्रोक्तवान् –

**भूक्षेत्रयानजननीसुखजन्मभूमि नाशं सुखे परगृहस्थितिमेव दत्ते [14]**

**पञ्चमभावस्थग्रहफलम् –**

यदि जन्मकुण्डल्यां सुतभावे रविः स्थितो भवति तदा जातकः पुत्रहीनः, बधिरः, कुरूपः, हिंस्रः, पापी, विद्याविहीनश्च भवति। यदि तत्र चन्द्रमा भवति तदा जातकः सुतधनविद्याबुद्धिषु प्रमुखो भवति। यदि मङ्गलः भवति तदा सः पापी, बधिरः, सुतहीनः, रूपहीनः, हिंस्रः, मूर्खश्च भवति। पञ्चमे बुधः, बृहस्पतिः वा शुक्रः विद्यते चेत्तदा जातकः विद्याधनसुतलाभं प्राप्नोति। शनिः वा राहुः भवतः तदा सः बधिरः, पुत्रहीनः, कुरूपः, हिंस्रः, पापी, विद्याविहीनश्च जायते।[15]

पञ्चमभावे सूर्यस्थिते जातकस्य कियत्फलप्राप्तिर्भवतीति विषये मन्त्रेश्वरदैवज्ञेनोक्तम् -

**सुखधनायुस्तनयहीनं सुमतिमात्मन्यटविगं**
**प्रथितमुर्वीपतिमरिस्थः सुगुणसम्पद्विजयगम् ।[16]**

पञ्चमभावे भौमस्थिते जातकस्य कियत्फलप्राप्तिर्भवतीति विषये मन्त्रेश्वरदैवज्ञेनोक्तम् -

**विसुखतनयोऽनर्थप्रायः सुते पिशुनोऽल्पधीः**
**प्रबलमदनः श्रीमान् ख्यातो रिपौ विजयी नृपः ।[17]**

**षष्ठभावस्थग्रहफलम् –**

षष्ठस्थाने रवियोगे जातकः शत्रुभयं न प्राप्नोति। चन्द्रे तु शत्रुविनाशो भवति। भौमयुक्ते शत्रुशून्यः, बुधयुक्ते शत्रुनाशः, बृहस्पतेः योगेऽपि शत्रुविनाशः। शुक्रे सति विद्वान् भवति। शनियुक्ते तु शत्रुनाशो जायते। राहकेतू षष्ठभावयुक्ते जातकः शत्रुकृतक्लेशभोगी स्थानत्यागी च भवति।[18]

षष्ठभावे बुधस्थिते जातकः शत्रुजित् भवति। अस्य विषये मन्त्रेश्वरदैवज्ञेन उक्तम् –

**जातक्रोधो विवादैर्द्विषि रिपुबलहन्तालसो निष्ठुरोक्तिः ।[19]**

षष्ठभावे गुरुस्थिते जातकः शत्रुहन्ता जायते इति विषये मन्त्रेश्वरदैवज्ञेन प्रोक्तवान् –

**षष्ठे स्यादलसोऽरिहा परिभवी मन्त्राभिचारे पटुः ।[20]**

**सप्तमभावस्थग्रहफलम् -**

सप्तमस्थाने रविः चेत् जातकस्य भार्याविनाशः जायते। चन्द्रयुक्ते अश्वगौरत्नलाभो भवति। मङ्गलयुक्ते जाया विनश्यति। बुधबृहस्प-तिशुक्रयोगे वा गोरत्नसंपद्भवति अधिकारी। शनौ सति जाया हानिः। राहुयोगे अपि जातकस्य भार्याहानिः।[21]

सप्तमे सूर्यस्थिते कियत् फलमिति मन्त्रेश्वरदैवज्ञस्य मतम् -

**नृपविरुद्धं कुतनुमस्तेऽध्वगमदारं ह्यवमतं ।[22]**

सप्तमस्त सूर्यस्थिते स्त्री पुत्रहिनो भवतीति विषये पराशरेणोक्तम् –

**वन्ध्यासङ्गो मदे भानौ चन्द्रे राशिसमाः स्त्रियः**[23]।

**अष्टमभावस्थग्रहफलम् –**

अष्टमस्थाने पापग्रहस्थिते जातकः कृपणः प्रवासी गोः क्लेशयुक्तः ऋणी बृहद्कायः कुवाक्यप्रवणः रचनाकारः अदाताऽनृतवक्ता च पापकर्मान्वितो भवति। यदि तु अष्टमे शुभग्रहाः स्युस्तदा जातकः शुभफलं प्राप्नोति, तस्य च मृत्युः शुभकाले वा गङ्गादिपुण्यतीर्थेषु वा भवति ।[24]

**नवमभावस्थग्रहफलम् –**

नवमस्थाने बृहस्पतिशुक्रचन्द्रबुधाः यदि स्युस्ते चत्वारः शुभग्रहाः अथवा तेषां मध्ये एको वा द्वौ ग्रहौ स्याताम् तदा जातकः धनरत्नादिं प्राप्नोति । स स्वर्णमूल्यवान् पात्रे जलपानं करोति, अतीवमूल्यवान्-पट्टवस्त्रादि परिधानं च करोति। सः च सर्वदा राजपूज्यः बहुपुत्रवान् सुन्दरीरमणीसंयुक्तश्च स्यात्, अतीवसुखेन कालं नयति। यदि तु तस्मिन् स्थाने पापग्रहाः तिष्ठन्ति तर्हि सः जातकः अति दुःखी पापान्वितः हीनबुद्धिश्च भवति।[25]

नवमे शुक्रस्थिते कियत्फलम् इति मन्त्रेश्वरेणोक्तम् –

**सदारसुहृदात्मजं क्षितिपलब्धभाग्यं शुभे** ।[26]

**दशमभावस्थग्रहफलम् –**

यदि दशमस्थाने शनैश्चरराहुभौमरवयः स्युः तदा जातकः क्षीणकर्मा, दुःखी, अल्पधनयुक्तः, हीनमलिनवेषधारी च कुलबुद्धिर-हितो भवति। एतदतिरिच्य यदि दशमस्थाने शुभग्रहाः स्युः तदा सः जातकः नानाविद्यापारङ्गतः, अतिधनवान्, कीर्तिमान्, सर्वजने आनन्ददायकः, भूमिसम्पत्तिशिलश्च भवति।[27]

दशमभावे ग्रहाणां स्थितियोगे किं फलम् इति विषये पराशरेण प्रतिपादितम् –

**सौम्ययुक्ते शुभस्थाने संस्थिते कर्मपे सति ।**
**वाणिज्यतो राजतो वा लाभो हानिर्विपर्यये ॥**
**दशमे पापसंयुक्ते कामे पापसमन्विते ।**
**दुस्कृतिं लभते मर्त्यः स्वजनानां विदुषकः ॥**[28]

**एकादशभावस्थग्रहफलम् –**

एकादशस्थाने शनिस्थिते जातपुरुषः धनपुत्रादिलाभवान् भवति। रवः मङ्गलः वा सति अदाता भवति। राहुः वा केतुः युक्ते क्लेशयुक्तोऽसुखी वातरोगी च भवति। एकादशस्थाने शुभग्रहाः संस्थिताः तर्हि सः पुरुषः गीतवाद्यनृत्यप्रियः, परोपकारी, मन्त्रयन्त्र-कुशलश्च भवति। तस्य केशाः नासिका हृदयं च सुन्दरं भवति।[29]

शनिः एकादशस्थाने स्थिते सति शुभफलानि ददाति इति अत्र मन्त्रेश्वरसिय वचनम् -

**भाग्यार्थात्मजतातधर्मरहितो मन्दे शुभे दुर्जनो** ।[30]

**द्वादशभावस्थग्रहफलम् –**

यदि द्वादशस्थाने रविमङ्गलशनिराहुकेतवः स्युस्तदा जातपुरुषः क्लेशभोगी सर्वस्वहीनः अत्यन्तकलहप्रियः रोगी तस्करश्च भवति। यदा तु द्वादशस्थाने चन्द्रबुधबृहस्पतिशुक्राः भवन्ति तदा सः सर्वकर्मासक्तः रागी धूर्तः अल्पवित्तः कृपणः पुत्रशोकी च भवति इति ज्ञेयम्।[31]

द्वादशभावे चन्द्रस्थिते किं फलं ददाति इति अत्र सन्त्रेश्वरः प्रवदति यथा –

**द्वेष्यो धिक्कृतवाग्व्यये वितनयः साघोऽलसः सेवकः** ।[32]

राहुयुक्ते द्वादशभावस्यः शुभशुभम् –

**प्रयच्छन्नाघरतो बहुव्ययकरो रिःफेऽम्बुरुक्पीडितः॥**[33]

एवमेव ज्योतिषशास्त्रोक्तशुभाशुभफलानि जातकपरिशीलनेन मानवस्य सुखं, दुःखं, भाग्यं, कर्म, शरीरस्य सौख्यासौख्यं, गृहं, पिता, माता, पत्नी, पुत्रपौत्रादि च सर्वविधविचारः क्रियते। "चक्रवत्परिवर्तन्ते दुःखानि च सुखानि च" इति कालस्य चक्रगति-न्यायेन मानवः कृतकर्मणः फलमनुभवतीति।

**संक्षिप्ताक्षरसूची:**

| | |
|---|---|
| १.बृ.पा.हो.शा/व.अ | बृहत्पाराशारहोराशास्त्रम् , वर्गविवेचनाध्यायः |
| २.बृह.ज्यो.ग्रह | बृहज्जोतिषसारसंग्रहः |
| ३.फ.दी / अ.अ. | फलदीपिका , अष्टमोऽध्यायः |
| ४.सा.व./ग्र.भा.अ. | सारावली, ग्रहभावफलाध्यायः |
| ५.बृह.शास्त्र/तृ.भा.अ | बृहत्पाराशारहोराशास्त्रम् , तृतीयभावफलाध्यायः |
| ६.बृह.शास्त्र/स.भा.अ | बृहत्पाराशारहोराशास्त्रम् , सप्तम भावफलाध्यायः |
| ७.बृह.शास्त्र/द.भा.अ | बृहत्पाराशारहोराशास्त्रम् , दशम भावफलाध्यायः |

**सन्दर्भग्रन्थसूचीः -**

१.ज्योतिषरत्नाकरः २. बृहत्पाराशारहोराशास्त्रम् ३.बृहज्जोतिषसारसंग्रहः ४.फलदीपिका ५.सारावली

**सन्दर्भ**

1. बृ.प.हो.शा/व.वि.अ./श्लो.सं.-३७
2. बृ.ज्यो.सा.सं
3. फ.दि./ अ.अ. /श्लो.सं-१
4. सा.ली/ग्र.अ/श्लो.सं-५०
5. बृह.ज्यो.ग्रह
6. फ.दि / अ.अ /श्लो.सं-२
7. सा.ली/ग्र.अ/श्लो.सं-१५
8. फ.दि / अ.अ /श्लो.सं-११
9. फ.दि / अ.अ /श्लो.सं-८
10. बृह.शास्त्र/तृ.भा.अ/श्लो.सं-२
11. सा.ली/ग्र.अ/श्लो.सं ६४
12. बृह.ज्यो.ग्रह
13. सा.ली/ग्र.अ/श्लो.सं-५
14. फ.दि / अ.अ /श्लो.सं-२९
15. बृह.ज्यो.ग्रह.
16. फ.दि / अ.अ /श्लो.सं ३
17. फ.दि / अ.अ /श्लो.सं ९
18. बृह.ज्यो.ग्रह
19. फ.दि / अ.अ /श्लो.सं १२
20. फ.दि / अ.अ /श्लो.सं १५
21. बृह.ज्यो.ग्रह
22. फ.दि / अ.अ /श्लो.सं ३
23. बृह.शास्त्र/स.भा.अ/श्लो.सं-७
24. बृह.ज्यो.ग्रह
25. बृह.ज्यो.ग्रह
26. फ.दि / अ.अ /श्लो.सं १९
27. बृह.ज्यो.ग्रह
28. बृह.शास्त्र/द.भा.अ/श्लो.सं-४,५
29. बृह.ज्यो.ग्रह
30. फ.दि/अ.अ/श्लो.सं२४
31. बृह.ज्यो.ग्रह
32. फ.दि/अ.अ/श्लो.सं१६
33. फ.दि/अ.अ/श्लो.सं२७